# SANSKRIT

| Class ▶ | VIII | Section ▶ | | Date ▶ | |
|---|---|---|---|---|---|
| Name ▶ | | | | Roll No. ▶ | |

**प्रश्नः(1) अधोदत्तं गद्यांशं पठित्वा एतदाधारितान् प्रश्नान् उत्तरत -**

अमेरिकादेशे अस्ति एकः विशिष्टः अब्रहामलिंकन इति नामकः विद्यालयः। अस्मिन् विद्यालये तृतीयकक्षायाः आरभ्य एव संस्कृतभाषा पाठ्यते। अस्मिन् विद्यालये इदानीम् 120 छात्राः पठन्ति। षोडश शिक्षकाः अध्यापनं कुर्वन्ति। छात्रेषु शिक्षकेषु वा एकोऽपि भारतीयः भारतीयवंशजः वा न अस्ति। किमर्थं संस्कृतं पाठ्यते इति पृष्टः विद्यालयस्य व्यवस्थापकः वदति - सर्वेषु अपि विषयेषु संस्कृतभाषायाः शुद्धाः ध्वनयः स्वराः, उच्चारणक्रमः, व्याकरणं, साहित्यं च छात्रेषु समुचितसंस्कारवर्धने सहायकानि भवन्ति। अहो! विश्वव्यापि महत्वं संस्कृतवाण्याः।

**अ) एकपदेन उत्तरत -**

1) अब्रहामलिंकन इति नामकः विद्यालयः कुत्र स्थितः ?

2)अस्मिन् विद्यालये कति अध्यापकाः अध्यापनं कुर्वन्ति ?

**आ) पूर्णवाक्येन उत्तरत-**

1)अस्मिन् विद्यालये कति अध्यापकाः पाठयन्ति ?

2)संस्कृतभाषायाः महत्वं कीदृशम् अस्ति ?

**इ)निर्देशानुसारम् उत्तरत -**

1) **भारतीयवंशे जातः** इत्यर्थे अनुच्छेदे प्रयुक्तं पदं किम् ?

2) **पठन्ति** इति क्रियापदस्य कर्तृपदं किम् ?

3) **अध्यापकाः** इति अर्थे अनुच्छेदे प्रयुक्तं पदं किम् ?

4) **संस्कृतवाण्याः** इत्यत्र का विभक्तिः प्रयुक्ता ?